National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2018; 1(18): 86-89
© 2018 NJHSR
www.sanskritarticle.com

डॉ.युद्धिष्ठिरसाहु:
संस्कृतविभागाध्यक्षः,
रेभेन्साविश्वविद्यालयः,
कटक, ओडिशा

Correspondence:
डॉ.युद्धिष्ठिरसाहु:
संस्कृतविभागाध्यक्षः,
रेभेन्साविश्वविद्यालयः,
कटक, ओडिशा

# भारतीयसंस्कृतौ गृहस्थाश्रमः – एकानुचिन्तनम्

**डॉ.युद्धिष्ठिरसाहु:**

संसारेऽस्मिन् सकलसुखकामिनः मानवाः आत्मसुखसर्वस्वमन्यमानाः सदा दुःखान्वितं सुखं प्राप्य परमधन्याः स्युः। वस्तुतस्तु पार्थिवसुखं केवलमिन्द्रियानुकुलत्वात् परमात्मनः प्राप्तौ वाधकत्वेन लक्ष्यपथि अवतिष्ठते। एतत्सर्वं विज्ञमानाः तत्त्वदर्शिनः मनीषिणः मानवानां जीवनकालमाश्रम-व्यवस्थायां विभज्य परमानन्दप्राप्तये सुगमोपायः परिदर्शितः। ये खलु तेषु आश्रमेषु शास्त्रनिर्द्देशानुसारं आत्मनं सुयोजयन्ति। तेषां हि त्रिविधदुखमतीत्य परमात्मप्राप्तिः सम्भाव्यते। अन्यथा कर्मानुसारं विविधेषु योनिषु निपतिताः सन्तः केवलं दुखं भुज्यते । अपि च भारतीय-संस्कृतौ सा आश्रमव्यवस्था विश्वदरवारे अधुनावैज्ञानिकसाधनभुतेषु पार्थिवसुखसिधौ आत्मनं धन्यमन्यमानेषु समाजेषु समादियते । सा आश्रमव्यवस्थायां मानवजावनं चतुर्भिः आश्रमैः विभज्यते । यथा –

(1)ब्रह्मचर्याश्रमः (जन्मतः पञ्चविंशतिवर्षं यावत्)
(2)गृहस्थाश्रमः (दाम्पत्यजावनस्य प्रारम्भ, २६-५० वर्षपर्यान्तम्)
(3)वानप्रस्थाश्रमः (जीवनस्योद्देश्यसाधनार्थं श्रवणमननीदिद्वारा संसारं प्रति वैराग्य स्थापनम्)
(4)सन्यासाश्रमः (शास्त्रनिर्द्देशानुसारमभ्याससाधनायां पूर्णरूपेण शरीरभावस्य परित्यागपूर्वकं परब्रह्म-प्राप्तये अन्तिमसाधनम्)

एतेषु चतुराश्रमेषु गृहस्थाश्रमः सर्वश्रेष्ठाश्रमः अपरमाश्रमत्रयं तस्योपरिआश्रित्यत्वात्। अतः अत्र गृहस्थाश्रमस्य मार्मिकचर्च्या संपाद्यते शास्त्रप्रमाणवचनसाहाय्येन ।

**I. गृहस्थाश्रमस्य धर्मः –**

केवलं विवाहानन्तरं पुत्रकन्यादिना सह गृहस्थजीवनं सुखमात्रमस्ति। तत्र गृहस्थिनां कृते किञ्चित् आदर्शपूर्णं कर्त्तव्यं साधितव्यम् । तस्मादुच्यते यथा –

**सानन्दं सदनं सुताश्च सुधियः कान्ता न दुर्भाषिणी।**
**सन्मित्रं सुधनं सुयोषिति रतिश्चाज्ञापराः सेवकाः।।**
**आतिथ्यं शिवपूजनं प्रतिदिनं मृष्टान्नपानं गृहे।**
**साधोः सङ्गमुपासते हि सततं धन्यो गृहस्थाश्रमः।।**

जैमिनिरपि धर्मलक्षणप्रसङ्गे असूत्रयत् यथा – "चोदना लक्षणोऽर्थोधर्मः" पार्थिवसुखप्राप्तये मनुष्यशरूरं न प्राप्यते जीवेन । अपि च शास्त्रविहितयागादिकर्मानुष्ठाने ब्रह्मलोकप्राप्तिरेव इष्टम् । यतोहि त्रिणीपूण्ये जीवः ब्रह्मलोकात् पुनः मर्त्यलोकं निविशते । तस्मादुच्यते गीतायाम् । यथा –

**"या ब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनः"**[२]

अतःआत्यन्तिकदुःखनिवृत्तिपूर्वकं परब्रह्मप्राप्तिरेव मानवानां जीवनस्य परमं लक्ष्यं भवेत्। तदर्थं यद्यपि प्रवृत्तिमार्ग (गृहस्थजीवनम्) निवृत्तिमार्गः (सन्यासजीवनम्) च उपदिष्टौ। परन्तु कलौ प्रवृत्तिमार्गः

सुगमोऽस्ति। गृहस्थाश्रामे मनुष्यः इतराणां सुखप्राह्यर्थं कृतसंकल्पः सन् स्वसुखं परित्यज्य जवति चेत् मार्गोऽयं मधुमयं भवेत् । अन्यथा न तथा।

**II. गृहस्थाश्रमे हिंसाः तेषां निराकरणञ्च ।**

कृषिकार्यतः प्रारम्भ यागादिक्रियानुष्ठानेन प्रत्यक्षरूपेण परोक्षत्वेन वा अनेकाः हिंसाः संपाद्यते। ताभ्य मुक्तये पञ्चमहायज्ञाः करणीया तद्यथा–

(1) पितृऋणम् (ख) देव-ऋणम् (ग) ऋषि-ऋणम् (घ) भूत-ऋणम्।

**III. गार्ह्यस्थस्य कायः –**

अधुना समेजे पाश्चात्यसमाजस्य प्रभावात् यूनां दृष्टिः तमसाध्वन्नं भवति। यैवनकालस्यपरिस्थितौ आत्मनियन्त्रणं त्यक्त्वा मैथुनादि-क्रियासु प्रवर्त्तन्ते ते। परन्तु अस्माकं शास्त्रे ब्रह्मचर्याश्रमस्य परिसमास्यनन्तरमेव गार्हस्थे प्रवेशार्थं निर्द्देशोऽस्ति। तदर्थं मनुस्मृतौ प्रोच्यते यथा –

**चतुर्थमायुषो भागमुषित्वाऽऽद्यं गुरौ द्विजः।**[3]
**द्वितीयमायुषो भागं कृतदारो गृहे वसेत्।।**

गार्हस्थाश्रमस्य कृते धनस्य प्रयोजनं नूनं विद्यते । तदर्थं येन केन रूपेण धनार्जनं नैव करणीयम् । अत जीवनयापनार्थं धनोपार्जनस्य मार्गोऽपि अस्माकं शास्त्रे निर्दिष्टः वर्तते। तथाहि मनुस्मृतौ यथार्थतया प्रोक्तम्-

**ऋतामृताभ्यां जीवेत्तु मृतेन प्रभृतेन वा।**[4]
**सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन।।**

अर्थात् ऋत-अमृत-सत्य-अनृत-वृत्तिद्वारा जीवनयोगायां धनमु-पार्ययेत् कालं यापयेच्च । न तु सेवावृत्तिना।

अत्र शङ्क्यते यत् पितृ-ऋणादिभ्यः मुक्त्यर्थं गाहस्थं करणीमिति चेत् सन्तानानुत्पत्तौ तर्हि कथं मुक्तिः? अस्या शङ्कायाः समाधानार्थं श्रीमद्भागवत महापुराणे कथितं यत्-

देवर्षि भूताप्तनृणां पितृणां न किङ्करो नायमृणी च राजन् ।
**सर्वात्मना यः शरणं शरण्यं**[5]
**गतो मुकुन्दं परिहृत्य कर्तम्।।**

तात्पर्यं यत् यः सर्वान् परित्यज्य केवलं भगवतः परमात्मनः शरणापन्नः सन् नित्यं तन्नाम स्मर्यते चेत् सर्वेभ्यः ऋणेभ्यः नूनं मुक्तिः सम्पद्यते इति न संशयः ।

**IV. गृहस्थस्येराणां कृते व्यवहारः**

आधुनिकसमाजे जनाः केवलं पुत्रसन्तानादिकं स्वजनरूपेण स्वीकुर्वन्ति। वस्तुतः प्रतिवेशितः प्रारभ्य सर्वेषां मानवानां प्राणानामुद्धिदानां कृते कुटुम्बभावः कर्त्तव्यः। तस्मादुच्यते – पञ्चतन्त्र तथाहि –

**अयं निजो परो वेति गणना लघुचेतनाम्।**[6]
**उदारचरितानां तु वसुधैव कुटुम्बकम्।।**

**V. गृहे कुकुरक्षणप्रसङ्गः –**

अद्यतनं समाजे प्रायतः नगरीषु जनाः स्वप्रतिष्ठाप्रदर्शनार्थं कदाचित् ककुरं प्रति अत्यधिकं स्नेहं प्रदर्शयितुं गृहे गृहे कुकुरः परिपाल्यते। एवमपि शयनगारे स्वशय्यायामपि शेतुं प्रेरयन्ति। एतादृशं भावः शास्त्रनिषेधोऽस्मिन् महाभारते कथ्यते । यथा –

**स्वर्गे लोके श्ववतां नास्ति**[7]
**धिष्ण्यामिष्टापूर्त्तं क्रोधवशा हरन्ति।**
**ततो विचार्य क्रयतां**
**धर्मराज त्यज्य श्वानं नात्र नृशसमस्ति।**

अर्थात् कुकुरपोष्येण यद् किमपि याग-दान-परोपकारादिभिः अर्जितं पूर्ण्यं नश्यति। अतएव स्वर्गगमनसमये इन्द्रिण धर्मराजयुधिष्ठिरः वार्यते । अपि च पुनरपि महाभारते गृहे कुकुररक्षणं निषिध्यते निम्नोकवचनेन । यथा –

**भिन्नंभाण्डं च खट्वां च कुक्कुटं शुनकं तथा।**[8]
**अप्रशस्तानि सर्वाणि यश्च वृक्षौ गृहेरूहः।।**
**भिन्नभाण्डे कलिं प्राहुः खट्वाया तु धनक्षयः।**
**कुक्कुटे शुनके चैव हविर्नाश्नन्ति देवताः।।**
**वृक्षमूले ध्रुवं सत्त्वं तस्मात् वृक्षं न रोपयेत्।।**

कुकुरः अपवित्रः अशुद्धश्च पशुरूपेण शास्त्रेणाभिहितः तस्य स्वाद्यपेयादिकं तस्य स्पर्शः तस्योपवेशनस्थनञ्च अपवित्रं भवेत् । तेन गृहस्थस्य कार्यमपि अशुद्धतामाप्नोति। ततः अपवित्रादिरूपं नरकप्राप्तिः फलरूपेण प्राप्यते। परन्तु शस्यक्षेत्रादिरक्षणार्थं कुकुरपोषणं कृषिक्षेत्रे गृहात् दूरे कर्त्तव्यम्। तस्मै स्राधमपि दातव्यम्। परन्तु गृहे तस्य रक्षणं शास्त्रविरुद्धमस्ति इति न संशयः ।

पुनरपि शास्त्रे श्रीमद्भागवद् गीतायामुच्यते कुकुरस्याशक्तिः अन्तिमकाले जीवस्य स्मृतौ आगते सति । तस्य मानवस्य जन्मः कुकुरयोनिषु भवति । तस्मादुच्यते गीतायाम् –

**यं यं वापि स्मरन् भावं त्यज्यन्ते कलेवरम्।**[9]
**तं तमेवैति कौन्तेय सदा तद्भाव भावितः।।**

**VI. करप्रदाने गृहस्थस्य कर्त्तव्यम् ।**

समाजस्य गठनात् परं शनैः शनैः आदिममानकालात परं नगरजीवनयापन व्यवस्थायाःनिर्माणे करव्यवस्थायाः भूमिका महत्वपूर्णा अस्ति। अन्यथा सर्वाङ्गिगनोन्नति-साधनायां वाधकः संजायते। करप्रदाने कदाचित् जनाः स्वच्छतां न स्वीकुर्वन्ति। सत्यन्यायानुसारेण करं न ददाति । परिशेषे समुलं विनश्यति । अतः यथार्थतया प्रोक्तं यथा –

**अन्यायोपार्जितं द्रव्यं दशवर्षाणि तिष्ठति।**
**प्राप्ते चैकादशे वर्षे समूलं तदविनश्यति।।**

इन्द्रियजनितं सुखं प्रासुं जनाः पापपूण्यं विस्मरन्ति। ततः तैः प्रारब्धानुरूपं स्वर्गनरकादिप्राप्तिः स्वतः जायते। अतः बुद्धिमान नरः सर्वथा धर्मपथि गच्छति । इन्द्रियजनितं सुखं त्यजति । अतः श्रीमद्भागवते प्रोच्यते तावत् –

**सुखमैन्द्रिकं राजन् स्वर्गे नरकं एव च ।**[10]
**देहिनां यद् यथा दुःखं तस्मान्नेच्छेत तद् वुधः।।**

**VII. आदर्शसन्तानजनने शास्त्रोपदेशः**

दम्पति सन्तानोत्पतिकामनायां भगवतः शरणागतः सन् सुखसम्भोगे प्रवर्त्तिव्यम्। गर्भसञ्चारात् परं माता सत्कर्म-सच्चिन्तन-सच्चर्चन-सत्सोङ्गादौ मतिः रक्षणीया। उदाहरणं यथा प्रह्लादः प्रभृतयः। गृहस्थस्य परिवेशः सन्तानेषु मूलतः महत्वपूर्णं प्रभावं विस्तारयति। अतः गृहपरिवेशः आध्यात्मिकादिकगुणकीर्त्तन-धारायाः प्राङ्गणस्वरूपः करणीयः। उपदेशवचनैः शैशवावस्था-यामेव तेषु उत्तमः संस्कारः जायेत। तदर्थं पितृमातृणां निम्नोक्तगीतोक्तचनं सदा स्मरणीयम् । तद्यथा-

**"न मे पार्थास्ति कर्त्तव्यं त्रिषुलोकेषु किञ्चन।**[11]
**नानवाप्तमवाप्तव्यं वर्त्त एव च कर्ममि।।**
**यदि यहं न वृत्तेयं जातु कर्मण्यतन्द्रितः।**
**मम वर्त्मानुवर्त्तन्ते मनुष्याः पार्थसर्वशः।।**
**उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम्।**
**संकरस्य च कर्त्ता स्यामुपहन्यामिमाः प्रजाः।।"**

**VIII. सन्तानविवाहे पितृमातृणां कर्त्तव्यम् ।**

पुत्रस्य विवाहकरणे वध्वाः गृहपरिवेशः विचार्यः। तस्या स्वावविषये सूचनापि विज्ञेये। अनुरूपं कन्यायाः विवाहविचारे वरगृहस्य स्थितिः वरस्य योग्यता-स्वभावादिकं नूनमेव आकलनीयम्। तस्मात् यथार्थतयोक्तं यथा-

**"कुलं च शीलं च वपुर्यशश्च विद्यां च वित्तं च सनाथतां च।**
**एतान् गुणान् सप्त परीक्ष्य देया कन्या वुधैः शोषमचिन्तनीयम्।।"**

**IX. विवाहेसंस्कारे योतुकस्य स्थितिः**

यौतुकप्रदानं एका व्यवस्था न भवति। वैदिककाले कन्यासम्प्रदानकाले कन्यापिता स्नेहवशतः किञ्चित् तत्कन्यार्थं अदीयेत। परन्तु वरपक्षतः प्राप्तिकोमना न कृता आसीत्। तथापि वधूद्वारा आनीतं वस्तु वरपक्षः इतरेषु विरति स्म। स्वगृहार्थं तद्रव्यावरः वर्जनीयः आसीत् ।

अधुना तु धनलिप्सवः वराः वधूहत्यां कर्त्तुं न पश्चातापं कुर्वन्ति। परन्तु धनप्राप्तिः पारव्धानुसारं प्राप्यते। समाजे दृश्यते वहुपरिमकृते सति तथा धनं न प्राप्यते । परन्तु केनचित् स्वल्पायाञ्जेन वहुधनं प्राप्यते । अतएव सदुपायेन धनप्राप्तिः भवतु । तदर्थं प्रवलेच्छा नैव कर्त्तव्या । तेन पापाः विधीयन्ते । अतः निष्कामरूपेण कर्त्तव्यं करणीयम् । कामना न विधातव्या । यतोहि कामना हि सर्वपापानां मूलं कारणं । तस्मात् यथार्थतया गीतायामुच्यते । तथाहि-

**अथ केन प्रयुक्तोऽयं पापश्चरति पुरुषः ।**[१२]
**अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः।।**
**काम एष क्रोध एव रजोगुण समुद्भवः।**
**महाशन महापाप्मा विद्ध्येनमिह वैरिणम्।।**

**X. गार्हस्थे सन्तानकर्त्तव्यम्**

सर्वेषां जीवानां निर्जीवानां च लक्ष्मीनारायणौ पितृमातृरूपेण शास्त्रेषु उपदिष्टः वर्त्तते । अतः पुरुषः जगत्यस्मिन् कर्त्ताभावं परित्यज्य स्वपितृमातरौ प्रति तथा लक्ष्मीनारायणभावः धारणीयः । अतः यथार्थतया प्रोच्यते –

**माता च कमला देवी पिता देवो जनार्दनः।**
**बान्धवा विष्णुभाक्ताश्च स्वदेशो भुवनत्रयम्।।**

स्वशरीरं पितृमात्रोः सृष्टम् इति कृत्वा तस्मिन् ममत्वं परित्यक्तव्यम् । स्थुल-सूक्ष्मादिशरीरे पितृभायोः अधिकारः वर्त्तते इति चिन्तनीयम् । अतः महर्षि मनुः प्रसङ्गेऽस्मिन् यथार्थतया प्रोक्तम् । तथाहि-

**तेषामनुरोधेन पारत्र्यं यद् यदाचरेत् ।**[१३]
**तत्तन्निवेदयेत्तेभ्यो मनोवचनकर्मभिः ।।**

पित्रोः शरीर त्यागात् परं श्राद्धतर्पणादिकविधाने तेषामभीर्वादेन इहलोके परलोके च सन्तानानां मङ्गलं विधीयते। सुखसमृद्ध्यादिकं प्राप्यते। पित्रो सुखार्थम् आत्मसुखं परित्यक्तव्यम्। यथा यथा महाभारते भीष्मेण आवालब्रह्मचारिरूपेण जीवनं गृहीत्वा पित्रोः आशीर्वादः प्राप्तः आसीत् ।

पित्रोः आदेशः सदैव पालनीयः। रामायणे पितृ-आज्ञया श्रीरामचन्द्रः राज्यं वैभवं परमसुखं परित्यज्य वनवासनं स्वीकृतवान्। प्रसङ्गेऽस्मिन् तेन प्रोक्तं यथा – "पितुराज्ञया अहम् अग्नौ प्रवेशार्थं विषपानार्थं समुद्रे आत्मभारश्वर्जनार्थं च प्रस्तुतोऽस्मि" तस्मादुच्यते यथा–

**अहं हि वचनाद् राज्ञः पतेयमपि पावके।**[१४]
**भक्षयेयं विषं तीक्ष्णं पतेयमपि चार्णवे।।**

पितरौ च सन्तानानां कृते शिक्षणं दातुं न पारयेत् चेत् तौ पापभागिनौ भवतः। अत एव सन्तानानां यथार्थ शिक्षणं प्रति दम्पतिः

संकल्पवद्धा भवेत्। गीतायामपि उक्तमस्ति पुरुषः सर्वदा स्वकर्त्तव्यतः व्युच्युतः न स्यात् । स्व कर्मणा हि सः आत्मनः वन्धुः मित्रः च भवेत् । अतः उत्तमशिक्षा सदैव ग्रहणीया । तस्मादुच्यते –

**"उद्धरेदात्मनात्मनं नात्मनमवसदयेत्।**[15]
**आत्मैव ह्यत्मनो वन्धुरात्मैव रिपुरात्मनः।।"**

इत्थमेव वहुविधानि शास्त्रोपदिष्टानि वचनानि गार्हस्थानां कृते वर्त्तते। दाम्पत्यजीवनं न केवलं शरीरसुखार्थं कर्त्तव्यमिति भारतीय संस्कृतेः परमं वैशिष्ट्यम् । परन्तु पाश्चात्ये तथा विचारः नास्ति । केवलं धनयैवनसुखार्थं ते विवाहं केयत् कालपर्यन्तं क्रियन्ते। किञ्चित् मात्रं वौमत्येन विवाहविच्छेदे प्रवर्त्तन्ते । आत्मकैन्द्रिकत्वात्, अधुना भारतीयसमाजे भौतिकशिक्षायाः प्रावल्यात् युवानः आध्यात्मिकतः दूरं गच्छन्ति। आत्मसुख सर्वस्वभावनायां पित्रोः वार्धक्यवेलायां वृद्धाश्रमे निक्षेपयन्ति। एतेन कीदृशं पापः तैः विधीयते ते न जानन्ति। यदि भारतीयसंस्कृतेः परममहत्वस्य गार्हस्थाश्रमस्य धर्मं कर्त्तव्यादिकं साम्प्रतिकसमाजस्य युवानः न ज्ञातुं समर्थाः स्युः। तर्हि पाश्चात्य प्रभावात् भारतीयतायाः नाशः नूनं भविष्यति इति न संशयः।

**सन्दर्भटिप्पणी**

[१]जैमीनि सूत्रम् (१/१/२)

[२]श्रीमद्भागवद्गीता (८/१६)

[३]मनुस्मृतिः (२/९)

[४]मनुस्मृतिः (२/८)

[५]श्रीमद्भागवते (११/५/४१)

[६]पञ्चतन्त्रम्, अपरीक्षि/ ३७

[७]महाभारतम्, महाप्रस्थानम् ३/१०

[८]महाभारतम्, अनु/ (१२७/१५, १२७/१६)

[९]श्रीमद्भगवद्गीता (८/६)

[१०]श्रीमद्भगवद्गीतम् (११/८/१)

[११]श्रीमद्भगवद्गीता (३/२२-२४)

[१२]श्रीमद्भगवद्गीता (३/३६-३७)

[१३]मनुस्मृतिः (२/२३६)

[१४]वाल्मिकीयरामायणम् (अयोध्याकाण्डे, १८/२८)

[१५]श्रीमद्भगवद्गीता (७/५)